हरिसं. श्रीहरिहरायनमः॥ यदीयजन्मक्षणमात्रएवमुमुक्षतांचैवसतांभयानि। गतानिदूरंतंवृषभंकिलस्तुनमामिसूरं सर्ग-१

॥१॥ ममदुःखनाशे॥१॥ श्रीमदितिश्रीःशकप्रवर्त्तनपूर्वकवर्णाश्रमधर्मस्थापनलक्ष्मान्वितोभातिसमस्यास्तीतिश्रीमा
न्निसियोगेमतुप्सवासौविक्रमसूरोविक्रमादिसःसराभूपतिरेकनृपतिस्तस्ययःशाकोधर्मप्रवृत्तिकालस्तस्मा
त्प्रस्थाःसप्तचन्द्रगनगस्तूपश्चरंध्रागपष्टौवक्ष्यमाणकसूरणांकंदुःअस्थादौनिरूढलक्षणयासंख्यारूपोःर्थो
ऽवगम्यतेऽकानांवामतोगतिःतैर्मानेप्रमाणंयस्यसतस्मिन्मानंप्रमाणेप्रस्थादौमानश्लिष्टोऽन्नतोगृहेइति

श्रीमद्विक्रमसूरभूपतिशाकस्याष्टाग्निरंध्रक्ष्मामाने।द्वेःलितनोविरोधकृतिचैष्मारख्येकृतौवत्सरे॥ न्नात्स्वसु
न्तरगोलगेसितदलेचैत्रेनवम्यांविधौवारेवाक्पतिभेऽहतीयकरणेयोगेसुकर्माभिधे॥१॥ विष्यानेकार्थसंग्र

हहैमो अद्वेवर्त्तमानसंवत्सरेअब्दःसंवत्सरेइतिमेदिनीसंवत्सरोवत्सरोऽद्धोहायनोऽस्त्रीशरत्समाइत्समरःविर
ोधकृतिविरोधकृन्नाम्निवत्सरेषष्टिसंवत्सरांतर्गतेनवर्षेइष्मारख्येवसंताकृतौवसंतेष्मोपुष्पकालःसुरभि
र्गोबलांगकइतिहैमःचैत्रेमधुमासेस्याच्चैत्रेचैत्रिकोमधुरित्यमरःसितदलेवलक्षपक्षेश्वेतार्जुनौशुचिःश्वेता
वलक्षंसितपांडुरमितिधनंजयःभास्वतिसूर्येउत्तरगोलगेउत्तरगोलावलंबिनिउत्तरायनगतेइत्यर्थःनवम्यां ॥१॥

नवमीतिथौविधौवारेचंद्रवासरेवाक्पतिभेऽश्विन्यादिसप्तविंशतिनक्षत्रांतर्गतभविशेषेपुष्यनक्षत्रेसुकर्मा
भिधेसुकर्मनाम्नियोगेविष्कुंभादिसप्तविंशतियोगांतर्गतेयोगविशेषेतृतीयकरणेबवादिकरणांतर्गतकौल
वनाम्निकरणेऽलितनौवृश्चिकलग्नेऽलिद्रुणौतुवृश्चिकेइत्यमरःलग्नंमूर्त्तिस्तथांगंतनुरितिजातकालंकारे
सुराघटिकारात्रिगमनानंतरमित्यनुक्तमप्यनुसंधेयंसर्वेगिजीवनहरिदिग्विजयादिषुतथादर्शनात्शार्दूल
विक्रीडितंछन्दःसूर्याश्चैर्मसजस्ततःसगुरवःशार्दूलविक्रीडितमितिलक्षणात्॥१॥ चंद्रइतिचंद्रेविधौभागपगते

चंद्रेभागपगतेरवौफलगतेप्राप्तेक्षितीयंकुजेलग्नेशीतकरात्मजेफलगतेसार्द्धेगुरौसौरिणा॥ शुक्रेस्वोच्चगतेचतु
र्थभवनेराहौरिपुस्थेन्सयंकेतौगच्छतिसुक्षयेतनुभृतांसप्रादुरासक्षितौ॥२॥ स्वस्वामिकेलग्नान्नवमभवन
गतस्वराशिंप्राप्तेस्वामिककर्कस्यचंद्रमाइत्युक्तेःदेहंद्रव्यपराक्रमौसुखसुतौशत्रुःकलत्रंमृतिर्भाग्यंराज्यपदंक्र
मेणागमिलाभव्ययौलग्नतइतिजातकालंकारेलग्नान्नवमभावस्यभागपमितिसंज्ञोक्तारवौसूर्येफलगतेपं
चमभावंप्राप्तेक्षितीयंद्वव्यास्यक्षितीयंभवनंम्कुजेभौमेप्राप्तेलग्नेलग्नंमूर्त्तिस्तथांगमित्यादिनाजातकालंकारे
क्तेप्रथमभावेसौरिणाशनिनासार्द्धंसहगुरौसुरेज्येप्रथमभावेशानिगुरुभ्यांयुक्तेसतीत्यर्थःशनिसौरिशनैश्चर

इतिरभसः कृतगनेपंचमभवनगेत्रीतकराम्मते बुधेस्वोच्चगतेमीनाख्यस्वोच्चस्थानं प्राप्ते शुक्रे । क्रूरगुरौ बुद्धि
भवने पंचमभावे वर्त्तमाने राहौ रिपुस्थे षष्ठभवगे केतौ अपंचाद्वादशाभावम् गच्छतिसति तत्तुष्टतांस्वाश्रितजीवा
नाम् मुक्तये स्वाश्रितजनान्मोक्षं प्रापयितुमित्यर्थः क्षितौ पृथिव्याम् सश्रीहरिः प्रादुरासनरनाट्यानुरूपास
र्व्वज्ञननपन्नविषयतांगतइत्यर्थः उच्चस्थानानितु अजवृषभमृगांगनाकुलीरारव्यषवणिजोच्चदिवाकरादितुं
गाः स्त्रात्रिरविमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्चतेऽस्तनीचादिति सत्संगिजीवने विक्रमार्कनृपक
स्याद्वेनगानिवसूभूमिते । वर्षे विरोधकृन्नाम्निसौम्यायनगतेरवौ । वसंतर्त्तौमधौशुक्लनवम्यामिंदुवासरे । पु
ष्येयुकर्मयोगेचकरणेकौलवाकृये । लग्नेचवृश्चिकेयुक्ते गुरुणाशशिनासह । उच्चस्थानंगतेशुक्रेस्वराशिंगच
निशाकरे । रिपुस्थानंगतेराहौ बुद्धिस्थानंगतेबुधे । धनस्थानं कुजेयाते भास्करेचकृतालयमिति हरिदिग्वि
जयेच । कृतेरवौभाग्यगते ... केकुजे द्वितीयेस्फलगेचसौम्ये । लग्नेसुरौभास्करशिग्गासहेव मीनस्थशुक्रेसति
बुद्धिगेहे । राहौरिपुस्थेव्ययगेचकेतौ मवालरूपः प्रकटोबभूवेति अत्रोच्चस्थानादिगतग्रहफलानितेषांप
रस्परमैत्र्यरिभावादिविचारस्तुजातकाभरणादेरवगंतव्यः पूर्वोक्तमेवद्रष्टव्यम् ॥३॥ उक्तमप्यर्थमौक्तक्रमेणप्र
कारांतरेण पुनर्विवर्णयिषुः कविः प्राक्सर्गोक्तमर्थमनुवदतिमाघनैषधादिषुतथादर्शनान्नेषदोषः ॥३॥

तत्रमाघेविशेषतः प्राग्वर्णितस्यापिकृतोः पुनर्वर्णनम् नैषधेसरोरुहं तस्यदृशैवतर्जितमितिपूर्वोक्तार्थपु
नर्वर्णनम् प्रमुदितेतिद्रुहिणोवेधामुखंमुख्यंयेषांते चतेसुरेश्वरादेवेन्द्रास्तेषामधिनाथः पतिस्तम् तंबाल
भावंप्राप्तम् हरिमपिनिजमात्मीयम्तनयंपुत्रम् विदंतौ जानंतौ तौभक्तिधर्मौ तदीच्छयाश्रीहरेरेवेच्छया वि
स्मृत्ताविस्मरणभावंप्राप्तायातन्महत्त्वाश्रीहरेर्महत्त्वंतयासपदितत्क्षणमेवप्रमुदितंसंतातानंदमनोमान
संययोस्तौतथाभूतौ आस्ताबभूवतुः हिनिश्चितमेव द्रुहिणोविरिंचिः कमलासनः स्रष्टाप्रजापतिर्वेधाइ

प्रमुदितमनसौतदिच्छयास्तांसपदिहिविस्मृततन्महत्त्वयातौ । द्रुहिणमुखसुरेश्वराधिनाथं हरिमपिनंतन
यंनिजंविदंतौ ॥२॥ आसीन्मदोत्सवरसाकुभृतामदीयान्स्वर्गोऽपि निर्मलतरास्त्रिदशाव्रजानां ॥ द्योरकुलामर
विभास्वरसद्विमानैः नृणांतर्क्षतारकचयग्रहराजमाना ॥४॥ समरः पुष्पिताग्रावृत्तम् अयुजिनयुगरेफतो
यकारोयुजिचनजौजरगाश्चपुष्पिताग्रा इतितल्लक्षणात् ॥४॥ आसीदितितदातस्मिन्काले इहभूमौ अस
भृतांप्राणिनाम् स्वर्गोस्वर्लोकेऽपि त्रिदशादेवास्तेषां व्रजाः समूहास्तेषांचमहीयाननतिमहान् उत्सवउद्धर्षः ।
क्षणउद्धर्षोमहउद्धवउत्सवइत्यमरः आसीत् पोद्युलोकः व्योमेतियावत् द्यो दिवौद्वेस्त्रियामभ्रंव्योमपु

हरिसं· स्फुरमंबरं मित्समरः अतिशयेन निर्मलानि निर्मलतरा आसीत् अमराणां देवानां विभास्वरैर्विद्योतमानैः । सर्ग·१
॥ २ ॥ सद्धिमानैः आकुला चासीत् ऊरुशालि अश्विन्यादीनि नक्षत्राणि च तारकचया अश्मेता ए समूहाश्च हृष्टाः
शक्रादयस्तत्र तैस्तैर्गृहादिभिः रोचमाना प्रकाशमाना आसीत् इतः आरभ्य सप्त श्लोकानां वसंततिलका
वृत्तम् ॥ ४ ॥ रेजे इति गगने आकाशे गगनं स्फुरत् खमंबरम् वियद्विष्णुपदम् वा तु पुंस्याकाशविहायसी समरः
प्रभां कांतिं दधानः उडुगणो नक्षत्रव्रजः रेजे स्फुरत् शोभते स्म धरित्री पृथ्वी संततः शोभमानाः मंगलोच्चयाम मंग
रेजे प्रभामुडुगणो गगने दधानः सन्मंगलोच्चयपुरादिरभूद्धरित्री नीराणपयुः प्रकृतिमाशु सरित्सुरवानांस्वांता
निसद्विदिविसदां हरितः प्रसादं ॥ ५ ॥ आक्लायएववहतः क्षितिभूरिभारः क्षीणत्वमाप जनुषैव हि तस्य विष्णोः ॥
भूतानि निर्वृतिमवापुरपास्तवैरं रम्यो दयाय च जनुर्महनीयधाम्नाम् ॥ ६ ॥ सौधायपेषु तथाभूताः पुराद्यो
यस्यां तथोक्ता भूत् सरितो नद्यः पुरवानि प्रधाना नियेषां मानससरः आदीनां तेनां जलानि प्रकृतिं निर्मलत्वं ।
आशु तत्क्षणमेव अयुः प्रापुः संतो ये दिविसदो देवास्तेषां स्वांतानि मनांसि स्वांतं हृन्मानसं मनः इत्यमरः ह
रितो दिशाश्च दिशास्तु ककुभः काष्ठा आशाश्च हरितश्च ता इत्यमरः प्रसादं प्रसन्निनैर्मल्यमितियावत् प्रसादोनुग्र ॥ २ ॥

हे काव्यगुणस्वास्थ्यप्रसत्तिष्विति विश्वमेदिन्यौ ॥ ५ ॥ अक्लायेति विष्णोः सर्वावस्थावस्थितसकलचेतनाचेत
नेषु व्यापनशीलस्य तस्य भगवतो जनुषा जन्मना अकुर्वहतरो अतिशयेन वोढुमशक्यः क्षितेः पृथिव्याः भूरिभार
प्रचुरो भरः अक्लायैव ऊरिसेवुस्या ऊरिसंज्ञ साक्लाय्यस्य यो शाम्यक्षुचकुत इत्यमरः क्षीणत्वं क्षीणभावम् आ
पप्राप्तवान् अपास्तवैरं स्यक्तवैरं यथा भूतानि प्राणिजातानि निर्वृतिं निरूत्सवं अवापुरगच्छन् अत्रार्थांतरंस
स्यतिमहनीयमतिपूजनीयं धामप्रभावो येषां तेषां धामरश्मौ गृहे देहे स्थाने जन्मप्रभावयो रित्यनेकार्थसंग्र
आत्राग्रसुमंगलमभूदशुभं च किंचिद्वाति स्म पुण्यपुरुषोरभवाद् समीरः ॥ संविन्निदिहद्भिरुदये स्फभूतांक्षमेत
इष्टिं किमावरितुमंशुमतांधकारं ॥ ७ ॥ हे हेमः स्फजनुः स्फुट्टप्रादुर्भावः शार्मणां स्फरवानामुदय उत्सन्निस्तस्मै
जगतामितिभवतीति चतुर्थोपः हिनिश्चित ॥ ८ ॥ आत्रेति आत्राग्र स्फ दिदित्राग्र स्फ मंगलं कल्याणमभूत् मंगला
सितदूर्वायामुमायां पुंसिभूम्नि नपुंसकं तु कल्याणे इति मेदिनी किंचिदशुभममंगलं नाभूत् पुण्यः पवित्रः
पुरुषोरभवाद्सुंतस्फगंधवाहकः समीरो वायुः समीरमारुतमरुदित्यमरः वाति स्म ववौ संविन्निदिहद्भिनस्पष्टं धि
याधिक्यं अस्फ भूतां प्राणभूतां अभूत् यज्जन्मनि अज्ञानध्वांतरिपुसाजनानामात्मपरमात्मावबोधो भू

दिसर्थः । अंशुमतः सूर्यस्य उदये सति अंधकारे ध्वांते अस्फुटभूतां दृष्टिं आवरितुं आच्छादितुं किं क्षमेत न क्षमेतै
वेत्यर्थः । अर्थांतरन्यासो ऽलंकारः ॥ १ ॥ नैसर्गिकेणेति शुभा मंगलरूपा जनिर्जन्म यस्य तस्य अदभ्रं बहुलं
धाम दीप्तिर्यस्य तस्य अदभ्रं बहुलं बहु इत्यमरः तस्य हरेः नैसर्गिकेण स्वाभाविकेन दिव्येन वल्गुना दिव्यंल
वंगेधा ऽऽम्री वलो दिवि भवे त्रिषु इति मेदिनी सदरिष्टे सूतिकागृहे नाग्र्यया अरिष्टं सूतिकागृहं इत्यम
रः परितः सर्वतः अभितः परितः इत्सादिना द्वितीया विस्तृतेन विस्तृतवता महसा तेजसा महो भवेदुत्सवे तेजसो



नैसर्गिकेण महसा सदरिष्टगाग्र्यां दिव्येन तस्य परितो विस्तृतेन तूर्णं । लुप्तत्विषः शुभजने क्षणदाप्रदीपाश्चि
त्रार्पिता इव बभूवुरदभ्रधाम्नः ॥ २ ॥ मुग्धस्मितद्युतिविनिर्जितयामिनीशश्रीमन्नवांबुधरभास्वरबंधुरांगं ॥ भा
स्वन्मणीद्धवदनर्घ्यविचित्रभूषं माधुर्यरूपगुणमंजुलतादिवार्द्धिं ॥ ३ ॥ श्चेति विग्रहः लुप्ता त्विषो येषां ते क्षणदा
यां प्रदीपाः दीपकाः तूर्णं तेजो ऽधिक्यप्राप्तसमर्थरात्रिप्रदणं चित्रे अर्पिताः आलेखिता इव बभूवुरभवन् ॥ २ ॥ अ
ग्रहाभ्यां तमनुवर्णयति मुग्धेति मुग्धा सुंदरा या स्मितद्युतिर्हास्यकांतिस्तया विनिर्जितवान् तिरस्कृतो यामिनीशश्चंद्रो
येन तम् मुग्धः सुंदरे मूढः इति मेदिनी श्रीमान् सश्रीको नवः सद्यः संभृतसलिलो यो ऽंबुधरो मेघस्तद्वद्भास्वरं प्र ॥४॥

काशमानं बंधुरं रम्यं किंचिन्नतं वा अंगं यस्य तम् बंधुरं मुकुटे पुंसि स्त्री वंगते लकलकयोः बंधूके बधिरे हंसे त्रिषु सुं
दरनम्रयोरिति मेदिनी भास्वंतो ज्वलंतो ये मणयो ऽश्मविशेषास्तद्वत्सु अनर्घ्याः महामूल्याः विचित्रा विवि
धवर्णा भूषा भूषणानि यस्य तम् माधुर्यं अतिप्रियत्वेन मधुररसमयत्वं स्वरूपं सौंदर्यं च गुणाः प्रसादपदमनुलता
सुंदरता वता आदयः प्रमुखा येषां ब्रह्मण्यत्वादिगुणानां तेषां वार्द्धिः समुद्भूतम् ॥ ३ ॥ लक्ष्मीमितितडिल्कांविद्युत
श्चामरेश्वरशरासनं मिंद्रधनुश्च महता ऽपां चलत्तदिति तथोक्तः तेन सह इति तुल्ययोगे बहुव्रीहिः स चासौ वारिदश्चे

लक्ष्मीं क्षिपंतमनुवीक्ष्य तमीक्षणीयं सोल्कामरेश्वरशरासनवारिदस्य । पीतांबरं ललितोपलतगलीमौलिं दिव्या
कृतिं विविदतुः पुरुषोत्तमं तौ ॥ ४ ॥ घस्तस्य लक्ष्मीं शोभां क्षिपंतं तिरस्कुर्वंतं ईक्षणीयं दर्शनार्हं पीतं पांडु अंबरं व
स्त्रं यस्य तं ललितानि उपलानि मणयः स्तैः शालीनो शोभमानो मौलिः शिरोभूषणं यस्य तम् । दिव्या अप्राकृता आकृतिरा
कारो यस्य तं तथाभूतं अनुवीक्ष्य अवलोक्य तौ भक्तिधर्मौ तं श्रीकृष्णं पुरुषेषूत्तमस्तम् पुरुषेषूत्तम इति सप्तमी समा
सः न पुरुषाणामुत्तम इति षष्ठी न तु पुरुषः न निर्द्धारणे इति षष्ठीसमासनिषेधात् पुरुषश्चासावुत्तमश्चेति कर्मधा
रयसमासो ऽपि न तथा सति सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैरिति नियमात् पुरुषोत्तम इति स्यात् गोलोकाधिपतिरनंतसु

कोपास्य चरणकमलोराधारमालालितांघ्रिरनंतगुणगणनिधिः श्रीवासुदेवोयमिति विविदुः बुबुधुः ॥१०
निगदितेति निगदिता उच्चारितात्त्जयरावाजयध्वनयो येः यद्यपिजयारवाएवसंरावनिरावाइनिकोशेरावशब्दस्योप
सर्गत्वमस्तितथापिध्वनिध्वानरवस्वनाइसुक्तेरवएवरावइतिस्वार्थेऽणिविहितेनदोषः दुंदुभीनुपटहानुन्नाद
यंतः सर्वदेवाः सर्वेप्यमर्त्याः सुरभीणांसुगंधीनांकुसुमानांपुष्पाणांवृष्टिवर्षम् विचक्रुः अप्रसतिमायितः हर्षआ
नंदोयेषांतेतथोक्ताः सिद्धाश्चगंधर्वाश्चनेमुख्यायेषांतेउपदेवाः पुष्करेआकाशेदेवोव्योम्नीत्यावत्वयोमपुष्करमं

निगदितजयरावांदुंदुभीन्नादयंतः सुरभिकुसुमवृष्टिंसर्वदेवाविचक्रुः ॥ अनुजगुरतिहर्षाः सिद्धगंधर्वमुख्यानन
तुरमरनार्यः पुष्करेप्रीतिभाजः ॥११॥ द्विजषट्पदालिकलनिःस्वनाकुलस्तबकावभुर्विपिनराजयस्तदा ॥ नवकु
ड्मलीरजवनश्रियोनदत्वलितामहीसुरहिरण्यरेतसः ॥१२॥ बरमित्यमरः अनुजगुःसवादित्रंगानंचक्रुः अमर
नार्यः सुरांगनाः प्रीतिभजंतीतितथाभूताः सत्सः ननृतुरनुसमम् मालिनीवृत्तम् ननमयययुतेयंमालिनीभोगिलोकै
रितिलक्षणात् ॥११॥ द्विजेतितदाभगवत्प्रादुर्भावकालेद्विजाःपतत्रिणश्चषट्पदाद्विरेफाश्चतेषामालयःश्रेणयस्ता ॥५॥
सांकलनिःस्वनामधुरध्वनयस्तैराकुलाःस्तबकाःपुष्पगुच्छकायासांताःस्योगुच्छकस्तुस्तबकइत्यमरःमालाया

वलिपंक्तयः राजिर्लेखाततिवीथ्यौधोरणीश्रेणिरितिहैमः विपिनानांवनानांराजयोलेखाः विपिनंकाननंगहनंवनं
श्रेणिलेखास्तुराजयइतिचामरः बभुः शुशुभिरेनवैः नूत्नैः फुल्लैर्विकसितैः नीरजवनैः कमलकाननैः श्रियःशोभा
येषांतेतथोक्ताः नवंनवीनंसद्यस्कंप्रत्यग्रंनूतनंनूत्ननेइतिहैमः तदाबभूःमहीसुराणामग्निहोत्रिब्राह्मणानांहिरण्य
रेतसोकृतभुजो ऽग्नयइत्यावत् हिरण्यरेताकृतभुगित्यमरः बभूःइतआरभ्यपंचश्लोकानांसुमंगलाछन्दम् सजसाज
गोभवतिसासुमंगलाइतिलक्षणात् ॥१३॥ तनुजमितितदाएवंभूतावसरेअस्यभगवतःजनकः श्रीधर्मदेवः रमणी

तनुजंविलोक्यरमणीयविग्रहंजनकस्तदास्यमुमुदेमुहुर्मुहुः ॥ पणवानकप्रमुखतूर्यनिःस्वनःप्रबभूवतस्य
सदनेसुरवश्रवाः ॥१४॥ यःसुंदरोविग्रहःशरीरंयस्यतम् शरीरंवर्ष्मविग्रहमित्यमरः तनुजंपुत्रंविलोक्यसमी
क्ष्यमुहुर्मुहुःपुनःपुनः मुहुर्मुहुःपुनःशश्वदभीक्ष्णमसकृत्समाइत्यमरः मुमुदेजहर्ष तस्यधर्मदेवस्यसदने
निशांते निशांतपस्त्यसदनमित्यमरः सुरवः सुरवरूतश्रवःश्रवणंयस्यसः सातोऽदंतोऽपिश्रवःशब्दःपणवा
श्चआनकाश्चतेप्रमुखानिमुख्यायेषुतानियानितूर्याणिवादित्राणितेषांनिःस्वनःशब्दः मर्दलःपणवोऽन्ये
चआनकःपटहोस्त्रीस्यात् नादनिःस्वाननिःस्वनाइतिचामरःप्रबभूव ॥१५॥

युयुजुरिति पुरांगनाः पुरस्त्रियः अस्य श्रीधर्मसूनोः मुखं आस्यं वीक्ष्यालोक्य मुदिताः हृष्टाः सत्यः कृतेधर्मसूनोमुदा
हर्षेण आत्रिष्यं तत्पत्नीविसात्वा वोदं युयुजुः दत्तुः विजन गुरुगायनगीतानी तिरोष्य उपान्तः सीकृतः विभ्रमो भूषास्था
नविपर्ययो याभिस्ताः विभ्रमस्त्वरया काले भूषास्थान विपर्यय इति दत्तात्रेयके तथा भूताः सत्यः अथो इति मिगते पि
थः परस्परं मिथोऽमोऽसं रहस्यपी समरः नवनीतं च कुंकुमं च ते आदी येषां हरिद्रादीनां तानि नवनीतं नवोद्धृतम् दधि

युयुजुर्मुदा वितत गुरा त्रिषं सुतेमुखमस्य वीक्ष्य मुदिताः पुरांगनाः ॥ परिविक्षिपुर्भर्तृनामुपान्तविभ्रमा नवनीतकुंकुममु
खामथाभिः ॥ १४ ॥ भुवनेष्वपि त्रिषु जयारवो भवत्पुरुषोत्तमे प्रकटिते ऽखिलेश्वरे ॥ जनताहिताय कृतभूतरक्षणे सद
ने वृषस्य परमोत्सवस्तदा ॥ १५ ॥ सुतजातकर्म स यथा विधि द्विजैः समहामहं कृतिनिपुणैरकारयत् ॥ व्यतरत्तदार्थिषु ध
नादि मेघवदितिरा भवत्स्वतनये हरौ तयोः ॥ १६ ॥ सारं तक्र सारं त्र्यारजं मितिद्धिमः भर्तृणाम् अस्तं तं परिविक्षिपुरक्षिपन् ॥ १४
भुवन इति अखिलानां जनानां मीश्वरे नियंतरि प्रकटितं भक्तरक्षणं येन तस्मिन् पुरुषोत्तमे श्रीवासुदेवे जनताहि
ताय जनवृंदहितं कर्तुम् वृषस्य धर्मस्य सदने भवने प्रकटिते प्राकट्यं प्राप्ते सति त्रिष्वपि भवनेषु जयारवो
जयशब्दो ऽभवत् तदा परमश्चासावुत्सवश्च महोत्सवः इत्यर्थः सोऽप्यभवदित्यन्वयः ॥ १५ ॥ कृतेति स धर्मदेवः कृ ॥६॥

नरो निपुणाः संस्कारकर्माद्यभिज्ञास्तैः द्विजैर्वैदिकैर्ब्राह्मणैः यथाविधि विधिमनतिक्रम्य महांतो महोत्सवाः मह
त्वेवेर्न्तेत इति समहामहं सम महोत्सवसहितं कृत सुजातकर्म जातकर्माख्यं संस्कारम् अकारयत् निष्पादयामास यावे
न्न छिद्यते नालं तावन्नाप्नोति सूतकं छिन्ने नाले ततः पश्चात् सूतकं तु विधीयते इति नालच्छेदात्प्रागिति बोध्यम् तदा
जातकर्म संस्कारकाले अर्थिषु याचक जनेषु धनं स्वापतेयमादिर्यस्य तदादि अन्नं वस्त्रादिकम् तत्मेघवत् ध
नाघनश्च व्यतरत् दत्तवानिति पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षय्यमिति स्मृतेः देवाश्च पितरश्चैव पुत्रे जाते द्विज

सूतेस्तृतीये दिवसेऽथ तस्य बालग्रहा दुर्मदकोटराद्याः ॥ तं हंतुमाजग्मुरसौ हरिस्तान् विद्रावयामास निरीक्षणे
ना ॥१७॥ न्मनां आयांति हि निष्प्रश्रेष्टयुण्य हमिति चाह्यु चन्निस्मृतेश्च ॥ एवं तयोर्दंपत्योः हरौ भगवति स्वतनये
स्वसूनौ रतिः प्रीतिराभवत्समंततो जाता ॥ १६ ॥ सूतेरिति ॥ अथानंतरम् तस्य सूतेः हरेः प्रसूतेर्जन्मदिनात् इत्य
र्थः तृतीये दिवसे दुष्टो मदो बालव्यापादनजन्मो येषां ते च ते कोटराद्याः कोटराप्रमुखाश्च बालग्रहा बालपीडाक
राः ग्रहाः तं धर्मबालं हंतुं विनाशयितुं आजग्मुः असौ हरिः स्वजनकष्टहारको भगवान् ॥ तान् ग्रहान् निरीक्षणेन
विलोकनमात्रेणैव निद्रावयामास विद्रावणपूर्वं मारयामासेत्यर्थः इदं च जन्मलक्षणं नूतनं प्राक् ॥ १७ ॥

आनंदेति आनंदस्य आनंदमयोभ्यासादिनिमयविषयभूतत्वद्ददारण्यानंदवल्ल्याद्युपनिषत्प्रसिद्धोतिविल
क्षणतया भूतस्यानवधिकातिशयस्यानंदस्य कंदः मूलम् कंदस्त्वकंदे सस्यमूलेजलधरेऽपि च इति विश्वमेदि
नौ अत्र कोऽपि यद्यपि सस्यमूल इति विशेषोपादानमस्ति तथापि विशेषेण कंदमात्रसामान्ये लक्षणा द्विधोऽ
लौकिकः अप्रमेयः प्रमातुमशक्यः प्रथितो विख्यातः अनुभावो महिमा यस्य सः भगमस्यास्तीति भगवान् श्रीयो
निवीर्यैश्वर्यज्ञानवैराग्यकीर्तिषु माहात्म्ये ऐश्वर्ये यत्नेषु धर्मे मोक्षे च नारस्वावितिमेदिनी मुकुंदः स्वाश्रितानां मु

आनंदकंदो भगवान्मुकुंदो दिव्याप्रमेयप्रथितानुभावः ॥ श्रीधर्मसूनुर्बहुधेस तंत्रो नित्यं स बालेंदुरिवोरुतेजाः
१७ ॥ संकल्पतः स्वसदनं समुपेयिवांसं सार्द्धं मृकंडुतनयं समलोकयत्सः ॥ प्रत्युत्थितस्तमभिकांक्षितमाननाम
कल्पक्षमारुहस धर्मिमहाजनम्य ॥ १९ ॥ क्लिप्तदः स्वतंत्रः स्वाधीनः श्रीधर्मस्य श्रीधर्मदेवस्य सूनुः सः हरिरुरुत
धिकं तेजोयस्य तथाभूतः बालेंदुर्बालचंद्र इव नित्यं बहुधेऽवर्द्धत इंदुवत्कान्तम् अत्रोपमालंकारोऽनुप्रासश्चे
ति भयोः संसृष्टिः ॥ १७ ॥ संकल्पत इति संकल्पतः स्वसंकल्पेनत्राद्यणहितान्मसिः सहसार्द्धं स्वसदनं स्वालयम् समु
पेयिवांसं समुपागतवंतम् मृकंडोर्मुनेस्तनयं मार्कंडेयं मुनिम् स धर्मदेवः समलोकयदपश्यत् अभिकांक्षित 



आगमनाय मनः संकल्पमात्रेणाभीप्सितं साक्षादागतं तं मार्कंडेयम् प्रत्युत्थितः सत्वरमभ्युत्थितः सन् ऊर्ध्वं प्रा
णाह्युत्क्रामंतीतिस्मृतेः वयोवृद्धेऽपि गुर्वादावभ्युत्थानं नमस्क्रियां आतिथ्यं चादरेणैव शास्त्रान्त्या कुर्वन्नक्रवती भवे
दितिवायवीयोक्तेः आननामनमस्कारः ननु कथमभिकांक्षामात्रेण तदागमनमिति चेद्दर्थात्तस्मात्सेन तदा
हक्वल्पेति महांश्चासौ जनो महाजनः महापुण्यप्रवालितनस्तस्य अभिकांक्षितं वांछितम् कल्पयतिस्वाश्रितम
नोरथान्पूरयतीति कल्पः स चासौ क्षमारुहो वृक्षस्तेन समानो धर्मोऽस्येति तथाभूतं भवतीति शेषः इत्त आरभ्या

प्रीसायथाविधिविधायततः सपर्यां सोऽध्यायत श्रुतिविदां प्रवरो महर्षेः ॥ अर्घादिभिर्विनयवान्हिमहानुभा
वाः कुर्वंति नंदयितुमार्यजनान्प्रयत्नम् ॥ २० ॥ त्रयाणां श्लोकानां वसंततिलकावृत्तम् ॥ १८ ॥ प्रीसेति श्रुतीन्वेदान्विदंती
ति तेषां प्रवरः श्रेष्ठः स धर्मदेवः विनयोऽस्यास्तीति तथाभूतः सन् अर्घ्यमर्घार्थं इदं पादार्घाभ्यामिति यत् इदं तु
त्रिष्वर्घ्यमर्घार्थे इत्यमरः तदादिर्येषां गंधपुष्पादीनां तैः प्रीसा क्लेदेन यथाविधि यथाशास्त्रम् सपर्यां पूजां पूजान
मस्यापचितिः सपर्याचार्हणाः समाः इत्यमरः विधाय कृत्वा ततः सपर्याविधानानंतरम् अध्यायत प्रसन्नोऽभूत् त
था हि महानुभावो येषां ते तथा उक्ता महामहिमवंतो जनाः आर्यान्शुद्धेजनाश्रुतान्नंदयितुं प्रसन्नीकर्तुं प्रयत्नं श्रम

कुर्वंतिअर्थांतरन्यासोलंकारः॥२७॥ समितिअथैवंसपर्याचरणसं— —आर्याणिश्रेष्ठानिशीलानियस्यता

नियस्यतःसधर्मदेवः पद्मनामःश्रुतंत्वाध्ययनमिवसदासनंसत्श्रेष्ठंयदासनंतद्भूयमतत्राभयनपद्मनांतं
प्रकृतिकंज्योतिर्विदंदैवज्ञम् तंमार्कंडेयम्संभूषयन्वस्त्राकल्पादिभिः संतोभयन्सन् पुत्रस्यस्वकृतस्यनामकरणं
विधातुंयोचेअस्यसंज्ञांत्वंकुरुइतितमुक्तवान् सुधियाक्रमतिनाहर्षेणधर्मेणअर्थितोयाचितः अतःप्रमुदि

संभूषयल्लक्ष्यसदासनमार्यशीलोज्योतिर्विदंश्रुतमिवपद्मनामःपद्मनांनम्॥ पुत्रस्यनामकरणंसविधा
तुमित्थंयोचेर्थितःप्रमुदितःसुधियाहर्षेण॥३१॥ श्रुत्वेतिवीक्ष्यवचनंसशुभंमुहूर्तेहोमादिकर्मच
विधाययथावदित्थम्॥ तंप्राहतेऽवनमसौनिजसंश्रितानांतूर्णंकरिष्यतिविपत्क्षपणंजनानाम्॥३२॥

तःमहर्षेः॥३१॥ श्रुत्वेति समार्कंडेयःइतिपूर्वोक्तप्रकारंवचनंश्रुत्वा शुभंमुहूर्तेवीक्ष्ययथावद्यथाशास्त्रं
होममन्त्रादिर्यस्मिन्॥ तच्चतत्कर्मच विधायकृत्वा तंधर्मं इत्थंप्राहहेधर्म अयसौत्वत्सुतः येनैव निजान्आत्मीया
संश्रिताः॥ हताश्रयास्तेषांजनानां अवनंमनादिसंस्तुतिप्रवादाद्रक्षणम्॥ विपदामाधिदैविकाः॥ ध्या
त्माधिभूतप्रभवानामापदांक्षपणंविनाशनंच॥ करिष्यतिसंपादयिष्यतीति द्वयोरेकान्वयः॥३२॥ ॥८॥

सूनोरिति इतिपूर्वोक्ताद्धेतोःशुभोयःकर्कराशिस्तस्मिन्जनितजन्मनःमधौमासेचैत्रेमासिजनितजन्मनश्च अ
तःतवसूनोःहरिर्हरिरितिनामनामेतिशेषःभविताभविष्यति अगौरःरूपायोयःताराख्यवर्णस्तस्मात् स्वीयान्आ
त्मीयायेआश्रिताजनास्तेषामंतरत्स्यांतःकरणस्यविकर्षणात आकर्षणाच्च कृष्णःकृष्णनामाभविताइदंनाम
द्वयंहरिरितिकृष्णइतिचनाम्नोर्द्वयंपृथक्भिन्नंभिन्नम्भवितामिश्रमपिहरिकृष्णइत्येकमपिनामभवितातत्रा
यंविवेकःउाहाकर्कइतिज्योतिर्विदांकर्कराशावुत्पन्नस्यहरादिनामत्वात् हरतिनाशयतिस्वाश्रितजनानांसकल्पा

सूनोस्तवेतिजनितःशुभकर्कराशौमासेमधौहरिरगौरताराख्यवर्णात्॥ स्वीयाश्रितांतरविकर्षणतःशुकृष्णोनाम
द्वयंपृथगिदंभवितापिमिश्रम्॥३३॥ पदइतिहरतिस्वस्मिन्लाकर्षतिस्वेक्षकजनमनांसीतिहरिरितिशु
स्त्रेष्वहरिनाम॥ कृष्णवर्णत्वात्कृष्णनाम कृष्णोऽनंतोऽच्युतश्चक्री वैकुंठोऽथजनार्दनः॥ उपेंद्रोयज्ञ
पुरुषोवासुदेवस्तथाहरिः॥ योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमादितिगार्ग्योक्तेश्चैत्रमासेप्रादुर्भावा
त्कृष्णः॥ नामद्वयस्यहरेरित्यस्यकृष्णइत्यस्यद्वयस्यापियोगात्कर्षत्युन्मूलयतिस्वभक्तदोषानितिकर्षसा
कर्षयतिस्वस्मिन्भक्तचेतांसीतिशुसतेश्चहरिश्चासौकृष्णश्चेतिशुसमतेरेहरिकृष्णनामापीतिनामनिरुक्तिः॥३३॥

हरिसं॰ नाव इति हे धर्म त्वदीयस्तावकः तथा नावोबालः नावगतावस्मात् घञित्नावइति स्वार्थे कनि नावकोपि वैराग्यं च सर्ग.१
॥९॥ विरक्तिश्च योगोष्टांगयोगश्च तद्योधर्मस्तु विनिर्जितं चतपश्च चांद्रायणादितपश्चरणक्रियाचतैः नीचेलनीलकं
वेनसमस्तकस्मोभविष्यतितत्तः कलवकरैः सेवकत्वनकलोत्सादकैः गुणैः दयालुत्वादिभिः नाम्नासंज्ञयाचनीलकंठः
नीलः परोपकारार्थं विषपानेनकंठः कंठोयस्यसश्रीनीलकंठस्तद्वत्परोपकारातिशायवत्त्वादिभिस्तदाख्यः श्रीनीलं
कंठवद्वैराग्यादतिशायवत्वात्तदाख्यः एवंतदाकैरतिमहद्भिः गुणचयैरनवधिकातिशायासंख्येयकल्याणगुणग

णवोभविष्यतित्रिविनसमस्तदीयोवैराग्ययोगतपश्चविनिर्जितयोभिरेव॥ नाम्नागुणैः कलवकैरितिनीलकंठेनेक
विधोगुणचयेश्चरितैरुदारैः॥२४॥ आराध्यएवनिखिलैः कलमात्मतंत्रोनारायणः प्रभुरमेयविदाम्पतेवः॥ श्र
त्वेसस्तस्यमवाप्तुरात्मसूनोर्मोदंत्वदभ्रमहिमानमवाप्तकामौ॥२५॥ तौ: चरितैश्चरित्रैश्च नैकानेकान्प्र
विधाः संज्ञायस्यसः इत्थंभूतः भविष्यतिसंबंधः॥२४॥ आराध्यइति निखिलैरखिलैर्ब्रह्मादिदेवैः निखिलैर्मुक्तै
र्मुमुक्षुभिर्वा आराध्यउपास्यः आत्मतंत्रः स्वतंत्रः नारायणः एषतवकलः वोयुष्माकम् प्रभुरप्रमेयम् कलवमविद
स्तेविनोषेणप्रतिपादयिष्यसेवाअवाप्तोअधिगतः [illegible] कामामनोर ॥९॥

योयाभ्यांतौतौदंपतीइत्थंभूतंमार्कंडेयोक्तं आत्मसूनोः अदभ्रोबहुतरोयोमहिमातम् श्रुत्वाअसंज्ञायंयथाव
थाप्रमोदं हर्षं अवाप्तुरधिगतमु॥२५॥ चक्रइतिउदारमतिर्महामतिर्धर्मदेवः भूषाश्चवासांसिचधनानिचअनर्घा
णिमहामूल्यानिभूषावासोधनानिआदयोयेषांतैः पुनः महर्षेमार्कंडेयस्य अर्हणंपूजांचक्रे कृतवान् पूजानम
स्यापचितिः सपर्याचार्हणाः समाइत्यमरः॥ अवाप्ता अधिगतानितांतकांतिरसंततश्शोभायेनसमुनिरपिनिजाश्र

चक्रेऽर्हणांपुनरनर्घ्यविचित्रभूषावासोधनादिभिरुदारमतिर्महर्षेः॥ प्रागान्निजाश्रममवाप्तनितांतकांतिः सं
भावनाहिवितनोतिजनस्यतेजः॥२६॥ वर्षेतृतीयशुभचौलकर्मद्विजैर्मुदाकारयदात्मसूनोः॥ सतर्पयामासविवि
त्रभोज्यैर्महोत्सवेतत्रसतश्चविप्रान्॥२७॥ तत्राखिलेनांदिवसेजिघांसुः कंसोरदेसः किलकालिदत्तः॥ संतीव्ररू
सानलसंप्रयोल्काबालंमनोज्ञाहृतिमात्तगाम॥२८॥ मंस्वावासमुपागात् तथाहिसंभावनासत्कारः जनस्यतेजः
वितनोति अर्थोतरन्यासोलंकारः॥२६॥ वर्षइति सधर्मदेवः तृतीयेवर्षे आत्मसूनोः शुभंचतच्चौलकर्मच प्रथमके
नावपनाख्यंसंस्कारंमुदाहर्षेणद्विजैः अकारयत्कारयामासतत्रमहोत्सवेविचित्रभोज्यैः पायसादिनानाविधा
न्नैः सतः साधून् विप्रान्ब्राह्मणांश्चतर्पयामासप्रीणयांचकारइतस्त्रयाणामुपजातिवृत्तम्॥२७॥ तत्रेतितत्रदि

वसेतस्मिन्नेवदिनेऽखिलानांजनानामीशंनियंतारम् मनोज्ञःकंदर्पादतिरेकाकारोयस्यतम् बालंबाल्यावस्थ
मुतंहरिम् जिघांसुर्हंतुमिच्छन् तीव्रस्तीक्ष्णोयः हृत्सारःसोऽनर्जस्तस्यसंप्रयोक्ताप्रेषकः कालिदत्तःएतन्नामाका
लिदत्तनाम्नेकालिदासवाड्विवत्स्त्वम् कठोरदेशोनिर्दयोऽक्रूरः आजगामकिल ॥२८॥ क्रूरेतिसहरिःउग्रमसुलं
वंमलंबलंयस्यतम् तंपूर्वोक्तंकालिदत्तंमहासुरम् द्रुतंशीघ्रंक्रूरयात्मदृष्ट्यायामोहयामास मंदोमूढः सोऽसुरः

क्रूरत्वदृष्ट्याद्रुतमुग्रसत्वं समोहयामासमहासुरंतम् ॥ मंदः समोहादभवत्सरागः कर्मेढीकृहाघट्टनचूर्णितांगः ॥२९॥ कुर्व
ताम्पिनिरीक्षणमात्रंमोक्षदंसकलसद्गुणपात्रम् ॥ तंविलोक्यनवनीरदगात्रंमोदमापजनतातिमात्रम् ॥३०॥ स्व
स्तिकादिनवदिक्मललामव्रातलिदक्षचरणंरमणीयम् ॥ मीनमुख्यनगरम्यतरंकञ्जात्तमानशुभवामपदाब्जम् ॥३१॥

मोहाद्धेतोः महागुरुहेषुवृक्षेशिलाघट्टनेनास्फालनेनचूर्णितान्यंगानियस्यतथाभूतःसन्परासुर्मृतःअभवत् ॥२९॥ कुर्वता
मितिनिरीक्षणंदर्शनंतन्मात्रंकुर्वतामपिमोक्षदंसकलानांसद्गुणानांपात्रस्थानंनवनीरदवत्सुषमंकंदर्पंगात्रंशरी
रंयस्यतम् तंबालंविलोक्यजनवाजनतातनसमूहःअतिमात्रमसंतंमोदमानंदमापाप्राप्त गच्छत्तुतरंकादश्चश्लोका
नाम्वागतान्वयम् अस्मादनंतरंगणमेकादशाश्लोकानामनेनैकान्वयः ॥३०॥ स्वस्तीतिस्वस्तिकःआदिर्मुख्योये ॥१०॥



ऽतानिनवसंख्यानियानिदिग्ललामानिदिग्विचिह्नानितैः राजितंशोभमानंदक्षचरणंदक्षिणंअंघ्रिर्यस्यतंललाम
मस्यास्त्रभावेचलांछनध्वजवाजिषितिमेदिनी रमणीयंस्वभावसुंदरम् मीनोमत्स्यःमुख्योयेषुतेचतेनगरसरमाः
सत्सरम्यतराअतिरमणीयायानिकालक्ष्माणितैर्भ्राजमानंशुभंस्वभावतःशोभमानंवामपदाब्जंवामांघ्रिकमलंयस्य
तम्अंकः स्थानेऽतिकेमतौरूपकोऽङ्कलक्ष्मस्वितिविश्वः ॥३१॥ ताम्रेतिताम्राःरक्तवर्णायेपल्लवाःकिसलयानि
तैर्निभाःसदृशाःयाअंगुलयःकरशाखास्तासांराजिभिःश्रेणिभिःराजितोःशोभमानःअतिमृदुरसंतंकोमलः

ताम्रपल्लवनिभांगुलिराजिराजितातिमृदुसुंदरपादम् ॥ तुंगशोणनखनिर्गतरश्मिस्तर्जितोष्णकिरणद्युतिभासम् ॥
३२॥ किंचिदुन्नतमनोहरवृत्तगुल्फकोमलसुवर्तुलजंघम् ॥ वृत्तजानुकरभप्रतिमानसक्थिकंपृथुकटिद्वयरम्यम्
॥३३॥ सुंदरःसुंदरवर्णःपादोंघ्रिर्यस्यतम् तुंगाःस्वभावतउन्नताःशोणाःकोकनदरक्तवर्णाःयेनखाःपादांगुलिनख
ाःतेभ्योनिर्गताःनिःसृताःयेरश्मयःमयूखास्तैःतर्जिताःनिरस्कृताःउष्णकिरणस्योष्णांशुमालिनःरवेर्बहोर्बहुः
प्रकाशभासोदीप्तयोयेनतम् अत्रनखकांतीनांसुक्ष्मांशुकिरणसादृश्यंध्यात्वानरुद्धंधकारविनाशकर्तृत्वसाम्या
न्नतुतापकरणत्वेन ॥३२॥ किंचिदितिकिंचिदुन्नतौमनोहरौवृत्तौवर्तुलौगुल्फौयस्यतकृच्छ्राघुटिकेगुल्फौविश्वमरः

कोमले मृदुले सुवर्तुले निम्नले तत्ते ध्येयस्य स चासौ स च तम् जंघा तु प्रसृता जानूरूपर्वमध्ये वदस्त्रियामिसमरः वृत्तौ
जानुनी यस्य करभस्य प्रतिमानमुपमानं ययोस्ते मणिबंधादाकनिष्ठं करस्य करभो बहिरिति समरः तथाभूते सक्थि
नी यस्य स सक्थिन्क्लीवे पुमानूरुरिति समरः स चासौ स च तम् समासांतः कः सदभ्रमहितं शुभ्रं च विशालं यत्कटिद्वयं तेन र
म्यस्तम् ॥ २३ ॥ निम्नेति निम्नो नतो गंभीरो वर्तुलः शुभो लक्षणवान् यो नाभिर्नाभिकूपः नाभिर्ने समरः द्वयोः प्राणिप्रति
कैस्यादितिमेदिनी तेन विराजद्भ्राजमानं कुंजरस्य गजस्य नालोऽग्रस्थितकरः अग्रहस्तः कुंजर एव नाग इति समरः तस्य दलं पत्रं तस्य

निम्नवृत्तशुभनाभिविराजत्कुंजराग्रानदलोपमतुंदम् ॥ विस्तृतोन्नतभुजांतरशालं दीर्घपीवरदृढोत्तमबाहुम् ॥ २४
सूक्ष्मदीर्घमृदुलांगुलिराजत्ताम्रपंकजकरद्वयमीशम् ॥ आयतद्युतिकरवृत्तहनुकं कंबुकंठतिलपुष्पसुनासम् ॥
२५ ॥
उपमा यस्य तत्तथाविधानउपरि विस्तृतमधस्तात्संकुचितं तुंदमुदरं यस्य तम् विस्तृतं विशालं उन्नतं तुंगं यद्भु
जांतरं वक्षस्थलं तत्र शालते शोभत इति तं तथोक्तं दीर्घा आजानुलंबिनौ पीवरौ पुष्टौ दृढौ मसृणौ उत्तमौ दोषवर्जितौ बाहू
भुजौ यस्य तं तथोक्तम् भुजबाहू प्रवेष्टो दोः इति समरः ॥ २४ ॥ सूक्ष्मेति सूक्ष्मा अणवः दीर्घा आयताः मृदुलाः कोम
लाया अंगुलयस्ताभिः राजच्छोभमानं ताम्रपंकजमिव रक्तपद्ममिव करद्वयं यस्य तम् आयता द्युतिः कांतिर्य 

स्याः सुवृत्ता वर्तुला सा चासौ सा च तथाभूता हनुर्यस्य तम् तस्य राहनुरिति समरः कंबुवत्त्रिरेखायुक्तः कंठो यस्य तं नाक
पार्थिवादित्वात्त्तरपदलोप इति समासः तिलपुष्पमिव सुष्ठु नासा यस्य स चासौ स च तम् कं सदा सुरतमय मूर्तिम् ॥ २५
उन्नतेति उन्नतं अतिविपुलं उत्तमकांतिमत् त्रिरेखं सुललाम मस्तचिह्नयुक्तं ललाटमलिकं यस्य तम् ललाटमलिकं
गोधिरिति समरः भंगुरयोः कुटिलयोः भ्रुकुटयोश्चारुः सुंदरो विलासो नर्तनं यस्य तम् स्निग्धाः सस्नेहाः सूक्ष्मा अण
वः कुटिला भुग्ना असिताः श्यामाः केशा यस्य तम् ॥ २६ ॥ हेमेति हेम्नः सुवर्णस्य हंसकैः पादकटकैः नूपुरसाराणां

उन्नतातिविपुलोत्तमकांतिमत्त्रिरेखसुललामललाटम् ॥ भंगुरभ्रुकुटिचारुविलासं स्निग्धसूक्ष्मकुटिलासितके
केशम् ॥ २६ ॥ हेमहंसकसुनूपुरसारसंजितातिरमणीयपदाब्जम् ॥ चित्रनूतनवरांबरधारं सत्कटिस्थितसुवर्णज
कांचीम् ॥ २७ ॥
नूपुरश्रेष्ठानां शिंजितैः शब्दितैश्च अतिरमणीयमतिमनोहरं पदाब्जं चरणकमलं यस्य तम् हंसकः पा
दकटको नूपुरो मंजीरो स्त्रियामितिचामरः चित्राणि विचित्रवर्णानि नूतनानि नवीनानि वराणि श्रेष्ठानि यान्यंबरा
णि वासांसि तेषां धारं धर्तारम् सत्सां कटिदेशे स्थिता सुवर्णजा सुवर्णकृता कांची कटिमेखला यस्य तम् शातकुंभक
लकांचिकलापमितिपाठे शातकुंभस्य सुवर्णस्य कलो मधुरमिनादः कांचिकलापो यस्य तम् शातकुंभे सुव

हरि सं. र्णस्यादितिमेदिनी कललोजीर्णोव्यक्तेचमधुरध्वनावितिविश्वः कोचनइतिकांचाकांविदीप्रिबंधनतयोः इनु चाङी सर्ग १
॥१२॥ ष्ठतदाकृस्याषिद्दतिभ्रारब्धा ॥३७॥ सादितिसंतः विचित्राः मणयो येषु ता नियानिशुद्धस्वर्णसूत्राणितैः संग्रथि
ताः मौक्तिकहारायस्य तम् स्वर्णस्य स्वर्णस्य कंकणेयस्मिंस्तच्चतत्करद्वयं च तस्य लीलाविलासोयस्य तम् तापनी
यस्य स्वर्णस्य रुचिरे ये अंगदे केयूरे ताभ्यां युक्तस्तम् ॥३८॥ स्मेरेति स्मेरेण मंदहासेन कुंदं रुचिरं यन्निजाननं तस्य
यंतस्यशोभया कांसात जिंतातिरस्कृतानइंदोसुंदरस्यनवपंकजस्यनवांबुजस्यचलक्ष्मीः शोभायेनतम् लोलतरे च

सद्विचित्रमणिशुद्धस्वर्णसूत्रसंग्रथितमौक्तिकहारम् ॥ स्वर्णकंकणकरद्वयलीलंतापनीयरुचिरांगदयुक्तम्
॥३८॥ स्मेरकुंदरनिजाननशोभार्जितेंदुनवपंकजलक्ष्मीम् ॥ चारुलोलतरतारकपक्ष्मश्रेणिराजितचरांबुजनेत्र
म् ॥३९॥ मंगलं विविधकंदरलीलां पावनीं विदधतं स्मरणीयाम् ॥ बंधुरावयवभास्वरमूर्त्तिं चारुचंचलगतिं तिर
लेक्षम् ॥४०॥
पललतरे तारके कनीनिके ययोस्ते पक्ष्मराज्या नेत्रलोमपंक्त्या राजिते चये चरांबुजे तत्सदृशे ये नेत्रे चारु
णी नेयस्य सोतम् ॥३९॥ मंगलमिति मंगलं श्रेयस्करं जनकल्याणरूपाम् पुनाति ति पावनी ताम् स्मर्त्तुं योग्यां स्मर
णीयां ताम् विविधा नानाविधा कंदरा स्वभावरूंदरायालीलातां विदधतं कुर्वाणम् बंधुरेषु शोभनेषु अवय ॥१२॥

वेषु प्रतीकेषु भास्वरा शोभना प्रकाशमाना मूर्त्तिर्यस्य तम् बंधुरः शोभनेनम्रइतिमेदिनी चारवी चंचला गतिर्यस्य तम् त
रलेचपले ईक्षे दृष्टी यस्य तम् विलोकयज्जनतामोदमापुस्सकादशाभिः कुलकं ॥४०॥ बलेति बलेन सामर्थ्येन अव
लेपो गर्वो येषां ये प्राप्तावलेपमेवक अवलेपः स्त्राभूषणे येषांतेचते अमरवैरिणाश्च अवलेपस्तु गर्वेस्यात् लेपने भूषणे
ऽपि चेतिमेदिनी तेषांवारा वृंदानिवारः सूर्यादि वासरे वारे हरेकुजवृक्षे वृंदावसरयोः क्षणे इतिमेदिनी तस्मै म
कृतधर्माय त्रपद्धचानुपीउनानि मुहुः पुनः पुनश्चक्रुः स धर्मः निजग्रामं निजसवसत्स्थानं तेभ्योउदस्य सत्का

बलावलेपामरवैरिवारास्तस्मै मुहुः चक्रुरुपद्रवं ते ॥ नीत्वा निजग्राममुदस्य तेभ्यो भयादयोध्यापुरमध्युवास
॥४१॥ तस्मिन्सुताभ्यां सहितः स्वनार्या वसंस्त्रिकालं सरयूजलेषु ॥ स्नानादिकर्माण्यकरोदजस्रं श्रीकृष्णभ
क्तिं कृतरां महात्मा ॥४२॥
तेभ्योथं ग्रामः स्यरेतांवसथे इतिमेदिनी भयात् अयोध्यापुरं अध्युवास तत्रोवास
अधिन्नीङि. तिश्राधारस्य कर्मत्वं इतोः श्लोकानामुपत्तानिहन्तम् ॥४१॥ तस्मिन्निति तस्मिन्नयोध्या
पुरे सुताभ्यां रामप्रतापश्री हरिकृष्णाभिधाभ्यां सूनुभ्यां स्वनार्या भक्त्या च सहितो युक्तः वसन् स धर्मः सरयू
जलेन्द्राख्याः पयसि त्रिकालं स्नानमादिर्येषु तानि च तानि कर्माणि च तानि अकरोत् करोति स्म महात्मा

हरिसं. यस्य सः उदारचेताः इत्यर्थः स धर्मः श्रीकृष्णस्य या भक्तिस्ताम् कृतरामनिशं न्यायेन अजस्रं निरंतरं चाकरोत्॥ सर्ग.१
॥१३॥ ४३॥ संवीक्ष्येति बालः स श्रीभगवान् स्वस्य पितुर्जनकस्य श्रीधर्मदेवस्य कुदीयसीमति दृढां भक्तिं श्रीकृष्ण
भक्तिं संवीक्ष्य तदानीम् धृताः बालकेलिपरिच्छदाः बाल्यावस्थाखेलोचितपरिच्छदा येन स तथोक्तः सन्॥
अनिशं प्रतिदिनम् तदीयां श्रीकृष्णसंबंधिनीम् सपर्यां नमस्यां पूजामिति यावत् पूजा नमस्यापचितिः सप
र्याचार्हणाः समा इत्यमरः चक्रे कृतवान् प्रतिदिनं स्वजनककृत भगवत्पूजाविधिं दृष्ट्वा स्वयमपि खेलनक्रिया

संवीक्ष्य बालो धृतबालकेलिपरिच्छदः श्रीभगवांस्तदानीम्॥ कुदीयसीं स्वस्य पितुः स भक्तिं चक्रे तदीया
मनिशं सपर्याम्॥ ४३॥ ध्यातं तदीयैस्ति मितप्रतिकोबालोऽपि यः सद्गुणसाधुवर्ती॥ ग्राम्यान्विहारानपहा
य साकं तीर्थाभिषेकं जनकेन चक्रे॥ ४४॥ यां कांचिद्भगवंतं परिकल्प्य तादृगुपचारैरार्चदित्यर्थः॥ ४३॥ ध्या
नमिति॥ बालोऽपि यो हरिः संतो गुणा येषां ते च ते साधवस्तद्वद्वर्तितुं शीलमस्य तथाभूतः स्तिमिता निश्च
लाः प्रतीका अवयवा यस्य तथोक्तः सन् तदीयं श्रीकृष्णसंबंधि ध्यानं चक्रे विदधे ग्राम्यान् ग्रामीणान् वि
हारान् खेलनानि॥ अपहाय त्यक्त्वा जनकेन स्वपित्रा साकं तीर्थेषु योऽभिषेकः स्नानं तच्च चक्रे॥ ४४॥ ॥१३॥

चकारेति किंच सरयूः श्रासौ नतटिनी धुनी च तस्याम् अनुरक्तैः स्वात्मनि अनुरागयुक्तैः बालैरर्भकैः सह सार्धम् नि
यमार्थमभिषेकः स्नानं तत् चकार कृतवान् अजस्रं प्रतिदिनम् अन्योपाणि निःशेषाणि यानि देवायतनानि रा
मकृष्णादिमंदिराणि तेषु तेषां देवानामवेक्षणं दर्शनं तस्मै रामकृष्णादिदेवदर्शनं कर्तुमित्यर्थः क्रियार्थोपपद
स्येसादिना अप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी पुर्य्यां साकेतनगर्य्याम् जगाम प्रतिमंदिरं व्रजति स्म॥ ४५
चर्णेति अथानंतरम् उदारा महती बुद्धिर्यस्य सः उदारश्चोदात्तमहतोरित्यमरः बाल्येऽपि बाल्यभावेऽपि द्विया अ

चकार बालैः सरयूतटिन्यां सहानुरक्तैर्नियमाभिषेकम्॥ अन्योन्यदेवायतनेषु जस्रं जगाम पुर्यां तदवेक्षणाय॥
४५॥ वर्णाश्रमाणां पितुरेष धर्मान्नारीश्च यान्मातुरथाशृणोत्सः॥ उदारबुद्धिर्निकरैरुपेतो बाल्येऽपि दिव्यामितस
द्गुणानाम्॥ ४६॥ यदेश्वरः संहृतदिव्यभावः प्राप्तो वयः पांचमवत्सरं सः॥ अस्तु तन्न्यांतरमणीयमिच्छारामाभिधं श्रे
मवती तनूजम्॥ ४७॥ प्राकृता अप्रमिता असंख्याता ये संतो गुणास्तेषाम् निकरैः समूहैः उपेतो युक्तः सन् एषहः
रिः सः वर्णाश्रमाणां तेषां धर्मान् पितुः सकाशात् अशृणोत् नारीश्च यान् स्त्रीधर्मांश्च मातुः आशृणोत्॥
४६॥ यदेति संहृतो गोपितो दिव्यभावः स्वैश्वर्य यन्नाक्रियैनसः तथापि ईश्वरः कुचित् कुचित् सहजतया हृत्प्रमा

नैष्ठूर्यः सद्धरिः यदा पांचमवत्सरं पंचमवर्षभवम् वयः प्राप्तः तदा प्रेमवती भक्तिः शांभशांभप्रवृत्तिकं रमणीयं 
 स्वभावस्फुंदरात्कृतिं दृष्ट्वा रामदूस मिधानाम यस्तम् तन्न्कजं पुत्रं अस्पृतत्प्रबुवे ॥४७॥ तस्मिन्निति तस्मिन्वर्षे ।
प्राप्तः प्राप्तोहर्षो येन सः अग्रजन्मा ब्राह्मणः तदीयः गुरुः हर्यगुरुः तं श्रीहरिम् अध्यापयत् पाठयामास बुद्धेः
गुणैः स्वकीयै र्नैसर्गिकै र्बुद्धिगुणैः नंदितः आनंदं प्रापितः पौरवर्गः पौरजनसमूहो येन सः हरिः अल्पकाला
त्स्वल्पेन कालेन यद्वृथ्यपवर्गे तृतीये निसूत्रात्तृतीयावक्तुं युक्तां युक्ता तथापि बुद्धिकस्मितायादानलसीका

तस्मिंस्तमध्यापयदग्रजन्मा वर्षे तदीयो गुरुरप्तहर्षः ॥ विवेद विद्याचयमल्पकालाद् बुद्धेर्गुणैर्नंदितपौरवर्गः ॥
४८ ॥ तस्मिन्निति पीतियुजः समग्राश्चक्रुस्तदीयं पृथुकाः प्रसंगम् ॥ कस्मो मुदा निरीक्ष्य यदा नु भक्तिं कायाधवस्ता
निवसः कृपालुः ॥ ४९ ॥
एसंचमी विद्यानां चयः समूहस्तम् ॥ चतुर्दशापि विद्या इत्यर्थः ताश्चोक्ताः अंगानि वेदाश्च
त्वारो मीमांसान्यायविस्तरः ॥ पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश इति विवेद अधीतवान् ॥ ४८ ॥ तस्मिन्निति
तस्मिन् हरौ अतिप्रीतियुजः अतिस्नेहवंतः समग्राः पृथुकाः सवयस्काः शिशवः तदीयं श्रीहरिसंबंधिनं ।
प्रसंगं चक्रुः कृपालुः कस्यः समर्थः सद्धरिः कायाधवः प्रह्लादः अस्मरतो कानिवामुदा हर्षेण तान्पृथुकान् ई 

नु भक्तिं भगवद्भजनरीतिं अन्वीक्ष्यत ॥ ४९ ॥ चक्रुरिति तदा ते पौरतोकाः पौरपृथुकाः प्रीत्या हर्षेण मुनीनां इवम
हामुनय इव तद्गुणानां श्रीहरिगुणानां गायनं गानं चक्रुः सर्वे पौराः पौरजनाः श्रीहरेर्भक्तिं भजंतिकुर्वंती तितयाभू
तान् तान् तोकान् स्वापसानि पश्चात्तुकृतोकापत्यप्रसूतय इति हैमः प्रसमीक्ष्य विस्मयमाश्चर्यं समीयुः ननु बाल
कारमेअतिबालं मतयः मुक्ता इव कथं जाता नात्र हेतुपश्यामि इति सर्वे साश्चर्यं जगदिरिति भावः ॥ ५० ॥ धर्मं मिति
शरणेरक्षणे साधुः शरणपस्तम् शरणागतभवाच्छिधत्रातारमित्यर्थः तत्र साधुरिति पस्त्रसयः शरणं गृहरक्षि

चक्रुस्तदा तद्गुणगायनं ते पीसा मुनीन्द्रा इव पौरतोकाः ॥ सर्वे समीयुः प्रसमीक्ष्य पौरास्तान्विस्मयं श्रीहरिभक्तिभा
जः ॥ ५० ॥ धर्मं शरणपं शरणं प्रपन्ना मुमुक्षवो ये च मकवर्णं मंत्रम् ॥ चक्रे सुधीस्तानुपदिश्य तेभ्यो निरस्तकुः संशयत्रो
कमोहान् ॥ ५१ ॥ उपादिशत्स्वीयगुरोः स तेभ्यः श्रुतानहिंसादिवृषान्सुदक्षः ॥ अहर्निशं तेहरिरूपभक्तिं युतांस्वध
र्मादिभिरेव चक्रुः ॥ ५२ ॥
श्रोरिस्मरः धर्मं श्रीहरिताकं धर्मदेवम् ये मुमुक्षवः शरणं प्रपन्नाः तेभ्यो जनेभ्यः सुधीः सधर्मः
वसवोष्टौ वर्णा अक्षराणि यस्य स चासौ मंत्रश्च तम् उपदिश्य तान् मुमुक्षून् कुः संशयाः कुष्टाः संशयाश्च शोकश्च मो
हश्च निरस्ताः स्ते ये षां तान् तथा भूतान् चक्रे विदधे ॥ ५१ ॥ उपादिशदिति सुतरां दक्षो ऽभिज्ञः सधर्मः स्वीयगुरोः श्रीरा

मानंदमुनेः सकाशात् श्रुतान् तेन आत्मने उपदिष्टानित्यर्थः अहिंसादिः प्रमुखा येषु तेच ते वृषा धर्मा-
स्तान् तेभ्यो मुमुक्षुजनेभ्य उपादिदेश उपदिशतिस्म तेथ धर्मोपदिष्टजनाः स्वधर्मादिभिः युतां युक्तां हरिकृष्णभक्ति
म् अहर्निशं प्रतिदिनमेव चक्रुः ॥५३॥ भर्तुरिति भर्तुः स्वामिनो धर्मस्य निदेशेन आज्ञया भक्तिः स्वयं प्रेमवशं पि प
रिग्रहेभ्यः पत्नीजनेभ्यः पत्नीपरिजनादानमूल्यक्रयणाः परिग्रहाः स्मरः सधर्मं धर्मेण सहितम् परमोपदेशम् भग
वन्मंत्रोपदेशमित्यर्थः चकार कृतवती कथंभूतम् संसारो जन्ममरणप्रवाहस्तस्माद्भयं तदपहरतीति तं तदी

भर्तुर्निदेशेन परिग्रहेभ्यो भक्तिः सधर्मं परमोपदेशम् ॥ चकार संसारभयापहारं तदीयकृत्स्नतर्कचयप्रणाशम् ॥ स
ऽथोपनिन्ये कृतमष्टमेऽसौ वर्षे यथावत्सरिरूप्य विप्रान् ॥ तत्रोक्तवेदानविरुद्धहर्षान् संभोजयामास सहस्रशस्ता
न् ॥५४॥
यायो बिन्दुतं बध्नितो ये क्ष्लक्षणांचयास्तान् प्रकर्षेणानाययतीति तं तथोक्तम् स्त्रीभ्यः स्वयुपदेशविधा
नं निर्णीतं शिक्षापत्रीभाष्ये आचार्यपत्नीधर्मं तत्र तत एवावगंतव्यम् ॥ ५३ ॥ अथेति अथ मंगले असौ धर्मः अ
ष्टमे वर्षे विप्रान् उपनयनप्रदानक्रियानिपुणान् ब्राह्मणान् परिरूप्य समाहूय यथावत् यथाविधि कृतं पुत्रम्
उपनिन्ये यज्ञोपवीतं प्रदर्शेन उपनयनसंस्कारं चकारेत्यर्थः तत्र तस्मिन् वेदानैः श्रीधर्मदेव विशनितैः स्तनादिमहादा ॥१५॥



नैर्विशेषेण हृष्टो हर्षेण आनंदो येषां तान् सहस्रशः तान् द्विजान् ब्राह्मणान् संभोजयामास स्वन्नाद्यन्नकृहितानक
रोदित्यर्थः ॥५४॥ नित्यमिति नैष्ठिकानां नैष्ठिकब्रह्मचारिणां ये धर्मास्तेषु संस्थाः स्थितिर्यस्य तथोक्तः स हरिः नित्यं
प्रतिदिनम् वेदाः आदयो मुख्या येषां तानि शास्त्राणि मीमांसादीनि तेषाम् अभ्यसनम् अध्ययनादिकम् अभ्यासम् चकार
असौ ईशः श्रीहरिः सरहस्यं रहस्यसहितं तदर्थं वेदाद्यर्थं पितुः सकाशात् सकृदेकवारम् श्रुत्वा सर्वं साकल्येन यथा
तथा विवेद ज्ञातवान् ॥५५॥ तस्मादिति महान्तो ये मुनयस्तेषां माननीयो मान्यतां प्राप्तोपि स हरिः तस्मात् पितुः मोक्ष

नित्यं हरिर्नैष्ठिकधर्मसंस्थो वेदादिशास्त्राभ्यसनं चकार ॥ पितुस्तदर्थं सरहस्यमीशः श्रुत्वा सकृत्सर्वमसौ विवेद ॥५५
तस्मात्स पेदे शुभकृष्णदीक्षां समाननीयोऽपि महामुनीनाम् ॥ मोक्षप्रदाष्टाक्षरमंत्रयुक्तां यथोपदेशं विदधे तदर्चा
म् ॥५६॥ एकादशेऽब्दे स जगाद भक्तिं मात्रे स्वकीयां चतुष्पाद्युपेतां ॥ दिव्यस्वरूपावगमोपपन्ना ततोऽजनिष्ठ ज्ञानवती
तनुं सा ॥५७॥
प्रदः अष्टाक्षरमंत्रो जप्यो यस्यां तां तथोक्ताम् शुभकृष्णदीक्षां मुद्रामालोर्ध्वपुंड्रधारणादिलक्षणा
म् प्रपेदे प्राप्तः पश्चात् दीक्षाप्राप्त्यनंतरम् यथोपदेशं उपदेशमनतिक्रम्य तस्य कृष्णस्यार्चापूजां च विदधे कृतवा
न् ॥५६॥ एकादशाब्द इति स हरिः एकादशे अब्दे स्वजन्मत एकादशे वर्षे चतुर्धा धर्मे आदिर्येषां तैरुपेतां धर्मज्ञान

हरिसं- वैराग्ययुक्ताभूदित्यर्थः स्वकीयामात्मीयां भक्तिं सप्रेमनवधाभजनप्रकाराम् मात्रे स्वजनन्यै जगाद कथयामास सर्ग-७
॥१६॥ ततः ज्ञानं स्वात्मपरमात्मस्वरूपयाथात्म्यनिर्णयरूपमस्यस्यास्तथाभूता दिव्यस्वरूपस्य दिव्यदेहस्य अव
गमः प्राप्तिस्तया उपयन्त्या युक्ता सा भक्तिः तनुं प्राकृतदेहं जहौ तत्याज प्राकृतदेहं संत्यक्त्वा दिव्यभागवतीतनुयु
क्तासीदित्यर्थः ॥५७॥ नापीति अथ सोऽपि हरिः तां स्वमातरं भक्तिं अत्रितनूजो दुर्वासास्तस्य यः शापो मनुष्यदेहप्राप्ति
रूपस्तस्मात् मोचयित्वा स्वीये आत्मीये ये पदे पादौ तयोरंतिकं सामीप्यं तस्मिन् अवासयन्निवासमकारयत्

तां मोचयित्वात्रितनूजशापान्न्यवासयत्स्वीयपदांतिके ऽसौ ॥ स्वकीयपुत्रेण वृषोऽग्रजेन क्रियास्तदीयाः समकारय
त्स ॥५८॥ निरास धर्मोऽपि कलेवरं निजं ततः स शापान्मुमुचेऽत्रिजन्मनः ॥ अकारयंस्ते समभोजयन्कृता द्विजान्
क्रियास्तस्य च सांपरायिकाः ॥५९॥
स वृषो धर्मः अग्रजेन पूर्वजेन स्वकीयपुत्रेण रामप्रतापाख्यस्वतनयेन
तदीया भक्तिसंबंधिनीः क्रिया निर्हरणाद्याः समकारयत् अध्यापयत् ॥५८॥ निरासेति धर्मो धर्मापरनामा देवशर्मा
द्विजोऽपि निजमात्मीयं कलेवरं देहं निरास तत्याज ततः देहत्यागात् हेतोः अत्रिजन्मनः दुर्वाससः शापादपि स
धर्मः मुमुचे मुक्तोऽभूत् ते रामप्रतापाद्यः कृताः तस्य धर्मस्य सांपरायिकाः परलोकोचिताः क्रियाः श्राद्धा ॥१६॥

द्याः अकारयन् तत्र द्विजान् ब्राह्मणांश्च समभोजयन् भोजयामासुः वंशस्थवृत्तम् जतौ तु वंशस्थमुदीरि
तं जरौ इति लक्षणात् ॥५९॥ परइति परे सर्वेभ्य उत्कृष्टे अक्षरे अक्षराख्ये धाम्नि स्थिते इति शेषः दिव्यौ अप्राकृतौ
विग्रहौ देहौ ययोस्तौ तथाभूतौ सन्तौ ऊर्जिता अतिप्ररूढा श्रीः शोभा यस्य तम् हरिं हरिकृष्णनामानं स्वसुतं भगवंतम्
भेजतुः सिषेवतुः अतिप्रतिप्रायेण प्रियः प्रेमास्पदस्तम् निजात्मजं स्वतनयं श्रीहरिकृष्णम् निरीक्षमाणौ स
दावीक्ष्यंतौ भक्तिः प्रेमवती च वृषो धर्मश्च तौ उभौ परामुत्कृष्टां मुदं प्रीतिमानंदमिति यावत् आपतुरधिजग्मतुः

परेऽक्षरे धाम्नि दिव्यविग्रहौ सदा हरिं भेजतुरूर्जितश्रियम् ॥ अतिप्रियं भक्तिवृषौ निजात्मजं निरीक्षमाणौ मु
दमापतुः पराम् ॥६०॥ अथ स्वसंबंधिजनान्विहाय स्कन्दस्यजातानग्रजकानुजादीन् ॥ प्रातर्ययौ स्नानमिषेण
तीव्रविरक्तिवेगाद्दिशमुत्तरां सः ॥६१॥
तुः वंशस्थवृत्तम् ॥६०॥ अथेति अथानंतरम् अग्रजश्च अग्रज
कोऽसौ ज्येष्ठभ्राता च अनुजः कनिष्ठभ्राता च तावादी येषां तान् स्कन्दस्यजातान् कृतशंकुः सेनापि सकुमन्त्राख्यान्
स्वस्मात्मनः ये संबंधिजनास्तान् विहाय संत्यज्य सः हरिः प्रातः प्रातःकाले स्नानस्य मिषं छद्म तेन तीव्राया विर
क्तेः वैराग्यं तस्य यो वेगस्तस्माद्धेतोः उत्तरादिशं ययौ उदीचीं दिशं लक्षीकृत्य स्वयमेकाक्येव विचचार ॥६१॥

विसृष्टेति ततः विसृष्टं संत्यक्तं रम्यं रमणीयं आत्मनिकेतनमात्मगृहं येन तस्य गृहं गेहं ओकः वसितवेश्मसद्म
निकेतनमित्यमरः कांतारे वने वासो निवसनं तत्र प्रियं प्रसन्नं मानसं चित्तं यस्य कांतारमुपसर्गोऽवनेऽपि गं
मवर्त्मनीति विश्वः तस्य हरेः प्रेमणा युक्तं प्रेमयुजः तदिति तथाभूताः सखायो मित्राणि समेताः मिलिताः संतः तं ह
रिमीक्षितुं द्रष्टुम् समाययुः समाजग्मुः ॥६१॥ नालोक्येति बालाः सवयसः कुमाराः स्वगृहे हरिगेहे ईशं
नियंतारं तं स्वसखायं हरिम् नालोक्य दृष्ट्वा औदास्यं आप्ताः प्राप्ताः संतः तदा तदानीं पुरेऽयोध्यायाम्।

विसृष्टरम्यात्मनिकेतनस्य कांतारवासप्रियमानसस्य ॥ समाययुस्तस्य ततः समेतास्तमीक्षितुं प्रेमयुजः स
खायः ॥६१॥ नालोक्य बालाः स्वगृहे विचिक्युरौदास्यमाप्ताश्च तदा तमीशम् ॥ पुरे तदीयासनसंप्रयाणस्था
नेषु गत्वा सरयूतटेषु ॥६२॥ तस्मीन्द्रदेशादिदिशि स्मरंतो मुकुंदमन्वेषणकारिणस्ते ॥ पर्यश्रुनेत्रास्तमनाप्य मि
त्रं पुनर्गृहं पद्मारमुपेयुरार्त्ताः ॥६४॥
तदीयानि यानि आसनस्य उपवेशनस्थानस्य संप्रयाणस्य प्रसहं गंतव्य
प्रदेशस्य च स्थानानि तेषु सरय्वाः तटेषु च गत्वा विचिक्युरन्वेषयामासुः ॥६२॥ तद्दितीति तस्य हरेरन्वेषणं ग
वेषणं तस्य कारिणः कर्त्तारस्ते बालाः तस्य भगवतो यासौ ह्रदेनातिस्नेहेनेक्षाः स्वावीक्षणं सान्निध्यादिर्यस्य ॥१७॥

आलापपरिरंभादेस्तन्मुकुंदः स्मरंतः अत एव परितो गतो निष्प्राप्तानि अश्रूणि याभ्यां तथाभूते नेत्रे येषां ते त
थाभूताः संतः मित्रं सखायं तं हरिं अनाप्यालब्ध्वा आर्त्ताः आर्तिदुःखाक्रांताः संतः पुनः वृषस्य हारं धर्मगृह
गणद्वारम् उपेयुः प्रापुः ॥६४॥ सेष्टामिति विरहेण वियोगेन आकुलाः ते बालाः महानभितस्तापो यस्य तं
सेष्टं हरिरूपमस्मदिष्टं भ्रातरं रामप्रतापं समागत्याभिगम्य तदीयः नीलकंठः असौ बंधुर्भ्राता क्वापि त्वदीयानी
पवित्रागमनस्थानेषु कुत्रापि तमार्गमाणैरस्माभिर्न वीक्षितः इति अवोचत् ॥६५॥ कुटुंबिन इति तस्य हरेर

सेष्टं समागत्य महाभितापं रामप्रतापं विरहाकुलास्ते ॥ न क्वाप्यवोचन्निति वीक्षितोऽसौ बंधुस्त्वदीयः किल नी
लकंठः ॥६५॥ कुटुंबिनश्चापि तदग्रजेच्छारामादयो ये च विनष्टकोशाः ॥ अन्वेषमाणास्तमनाप्य दीनास्ते प्रोचु
रित्थं विधुरव्यथार्त्ताः ॥६६॥ न केनचिन्नेतुमयं हि शक्यो रक्षोविशेषेण निहंतुमीशः ॥ यदीक्षणादेव यतः प्रयांति
पराभवं तेन गतः स्वतोऽयम् ॥६७॥
अग्रजो रामप्रतापः इच्छारामो भगवदनुजस्तावादी येषां ते सर्वे कुटुंबिनः तेऽपि विनष्टः
कोशः धैर्यराशिर्येषां ते च नष्टधना इव व्यग्रा इत्यर्थः तं हरिमन्वेषमाणाः संतः तं स्वबंधुं हरिम् अनाप्य अनधिगम्ये
व विधुरेण बंधुवियोगदुःखेन याऽवस्था तया आर्त्ताः पीडिताः अत एव दीनाः संतः इत्थं वक्ष्यमाणप्रकारेण प्रोचुर

वदन् ॥ ६६ ॥ नेतिर्दिङ्नाः अतिसमर्थः अयं हरिरुत्तमः केनचित्तु रक्षोविघ्नोघेण वलिष्टेनापि केन चिद्राक्षसा नेतुं ग्र
हीत्वा अन्यत्र गुप्तीकर्तुं स्थलांतरं प्रापयितुं वा न शक्यः निहंतुं हननं कर्तुं वा न शक्यः हि निश्चितं यतो यस्माद्धे
तोः यस्य ईक्षणं तं प्रति र्दि यत्क्रूरदृष्ट्या वीक्षणं तस्मादेव ते राक्षसाः पराभवं पराजयं प्रयांति ततः रक्षाहृतमस्य ग्रह
णं हननं वा न संभवत्येव तेन हेतुना अयमस्त तएव गतः ॥ ६७ ॥ इतीति इतीत्थं ब्रुवंतः कथयंतः असमं तं विघ्ना

इति ब्रुवंतोति विघ्नादिचिंतास्तद्बंधवः पौरजनाः समेताः ॥ अन्वेषितुं तेन गराद्बहिस्तं विनिर्ययुः कृष्णवदप्युनेत्राः
६८ ॥

द्दः चिंतेः स्मस्मिंस्तथाभूतं चिंतं येषां ते तथोक्ताः तस्य हरेः समस्तबंधवः संबंधिनः समेताः संघशास्तत्का
लेन मिलिताः पौरजनानागरिकाश्च कृततरां श्रवं तिप्रश्रूणि येभ्यस्तथाभूतानि नेत्राणि येषां ते तथोक्ताः संतः ते
सर्वे तं हरिम् अन्वेषितुं गवेषितुं नगराद्बहिः विनिर्ययुर्निर्जग्मुः यदि क्वापि विलीय स्थितस्तर्ह्यन्वेषणे न पश्यामः इति धियेति भावः ६८

सपदीति हरिणा भागवतासक्ता अतएव विगतानि मंगलानि यस्यास्तथोक्ता सती सपदि तत्क्षणमेव विगतः
प्रोषितः दयितः पतिर्यस्याः सा नारीव प्रोषितेम लिनाहुक्षेतिस्मरणात् न रेजे नैव शुशुभे धेनवो गावः तृणानि
यवसानि नाश्चुः नैव जक्षुरित्य दम्याः वत्साः पयो दुग्धं न पपुः वक्त्यो ग्नयः हवीषि कृतहव्यानि न जक्रुः न तग्र
हुः तस्याः पुनः उच्छोक तत्क्षणे शोकं तं निरीक्ष्य ग्रहाः भौमादयः भग्नाम संतं क्षोभं चलत्वम् अथ काव्येनैव यथा

सपदि हरिणा सक्ता रेजे पुरी न विमंगला विगतदयिता नारीवाश्नुस्तृणानि न धेनवः ॥ पपुरपि पयो दम्या जह्रु
र्हवींषि न वह्नयो ययुरथ तच्छोकं क्षोभं निरीक्ष्य भनुग्रहाः ॥ ६९ ॥ इति श्री हरिसंभवे महाकाव्ये हर्येककवि
श्रीमदविसानंदवर्णोत्कृते भगवतो बाल्यकेशोरचयोवर्णननामा सप्तमः सर्गः ॥ ७ ॥
तथा ययुः पापुः ह
रिणा हृत्तम् ॥ ६९ ॥ इति श्री यदुवाक्यप्रमाणपारावारीणधुरीणविश्वनाथभट्टात्मजदीनानाथभट्टत्रिवेण
श्रीपरमक्षपारूदेव श्री सहजानंदस्वामिचरणकमलोपासक गोपालानंदमुनेः प्रेरितमति माधवदास स
त्सहायमासाद्य टीकदयानं करात्मज श्री हरिरूपैक भक्त भोलानाथ भट्टकृतौ श्री हरिसंभवकाव्यस्य विद्व
ज्जाह्लादिमाख्यव्याख्यायां सप्तमः सर्गः ॥ ७ ॥ लि॰ रावलजेगामोरारजिसं॰ १९५६ माहवद ८ मेथाणग्रामेममामा